# 87 - सप्ताशीतितम दशकम्
# कुचेल उपाख्यानम्

कुचेल नामा भवतस् स तीर्थ्यतां गतस् स सांदीपनि मंदिरे द्विजः ।
त्वदेक रागेण धनादि निस्स्पृहः दिनानि निन्ये प्रशमी गृहाश्रमी ॥॥87-1॥

समान शीलाऽपि तदीय वल्लभा तथैव नो चित्त जयं समेयुषी ।
कदाचि दूचे बत वृत्ति लब्धये रमापतिः किं न सखा निषेव्यते ॥॥87-2॥

इतीरितोऽयं प्रियया क्षुधार्तया जुगुप्स मानोऽपि धने मदावहे ।
तदा त्वदालोकन कौतुका द्ययौ वहन् पटांते पृथुका नुपायनम् ॥॥87-3॥

गतोऽय माश्चर्य मयीं भवत्पुरीं गृहेषु शैब्या भवनं समेयिवान् ।
प्रविश्य वैकुंठ मिवाप निर्वृतिं तवाति संभावनया तु किं पुनः॥॥87-4॥

प्रपूजितं तं प्रियया च वीजितं करे गृहीत्वाऽकथयः पुरा कृतम् ।
यदिंधनार्थं गुरु दार चोदितैः अपर्तु वर्ष तदमर्षि कानने ॥ ॥87-5॥

त्रपाजुषोऽस्मात् पृथुकं बला दथ प्रगृह्य मुष्टौ सकृदाशिते त्वया ।
कृतं कृतं नन्वियतेति संभ्रमात् रमा किलोपेत्य करं रुरोध ते॥॥87-6॥

भक्तेषु भक्तेन स मानितस् त्वया पुरीं वसन् नेक निशां महा सुखम् ।
बतापरेद्युर् द्रविणं विना ययौ विचित्र रूपस् तव खल्वनुग्रहः ॥॥87-7॥

यदि ह्ययाचिष्य मदास्य दच्युत: वदामि भार्यां किमिति व्रजन् नसौ ।
त्वदुक्ति लीला स्मित मग्नधीः पुनः क्रमा दपश्यन् मणिदीप्र मालयम् ॥॥87-8॥

किं मार्ग विभ्रंश इति भ्रंमन् क्षणं गृहं प्रविष्टस् स ददर्श वल्लभाम् ।
सखी परीतां मणिहेम भूषितां बुबोध च त्वत् करुणां महाद्भुताम् ॥॥87-9॥

स रत्नशालासु वसन्नपि स्वयं समुन्नमद् भक्ति भरोऽमृतं ययौ ।
त्वमेव मापूरित भक्त वांछित: मरुत्पुराधीश हरस्व मे गदान् ॥॥87-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥